National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 150-151
© 2026 NJHSR
www.sanskritarticle.com

**विजयलक्ष्मी अम्माल्**
शोधच्छात्रा, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**विजयलक्ष्मी अम्माल्**
शोधच्छात्रा, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# 'त्रिगुणात्मकान्तःकरणवृत्तेः विचारः'

(Study of Triguṇa natured Antaḥkaraṇa according to Vedānta philosophy)

**विजयलक्ष्मी अम्माल्**

**Abstract**
This paper tells the functioning of the antaḥkaraṇa based on the Vedanta trdadition. And the study mainly based on the three gunas - sattva, rajas, and tamas. The antaḥkaraṇa, divided into mind(manah), intellect (budhih), ego (ahmakara), and memory(chittah). Here according to Vedanata philosophy, I am trying to explains how sattva produces clarity and happiness, rajas causes desire and activity, and tamas leads to ignorance and delusion. This paper will be helpful to understand the realize the tattva about self-knowledge and liberation, the central aim of Vedānta.

**Keywords –** अन्तःकरणम्, सत्त्वगुणः, रजोगुणः, तमोगुणः, अज्ञानम्

पञ्चभूतेभ्यः आगतः अयं प्रपञ्चः। तानि यथा - आकाशः, वायुः, अग्निः, आपः, पृथ्वी च इति। अयं प्रपञ्चः मायाकल्पित एव। अज्ञानवशात् जन्तुभिः ब्रह्मणि प्रपञ्चोऽयं कल्प्यते। यथा रज्जौ सर्पभ्रमः। अयमेव अध्यारोपः।अस्य अध्यारोपस्य अपवादेन वस्तुसिद्धिः संभवति। यथा - **नायं सर्पः** इति ज्ञानेन रज्वज्ञानापवादेन यथार्थवस्तुनः रज्जोः ज्ञानं भवति तथा मिथ्याभूतस्य प्रपञ्चरूपाज्ञानस्य अपवादेन यथार्थतथ्यस्य ब्रह्मणः ज्ञानं संभवति। तेन मुक्तिश्च भवतीति अद्वैतिनां सिद्धान्तः। इदमेव बोधयति उक्त्या अनया – **ब्रह्मसत्यं जगत् मिथ्या जीवो ब्रह्मैव नापर** इति। अस्य यथार्थावगमनेन मुक्तिप्राप्तये सर्वे अद्वैताध्ययनं कुर्वन्ति।

अत्र **दृश्यते अनेने**ति दर्शनम्। दर्शनेषु अन्यतमं भवति वेदान्तदर्शनम्। सर्वोपनिषदां सारसङ्ग्रहभूतमित्यस्मात् ज्ञानकाण्ड इत्यपि प्रसिद्धमिदं दर्शनम्। को नाम वेदान्तः इत्यत्र आह- **वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारिणी शारीरकसूत्रादीनि च** इति। उपनिषद्, भगवद्गीता, ब्रह्मसूत्रं च प्रस्थानत्रयमिति कथ्यते। एतेषां त्रयाणामपि भाष्यं विरच्य प्रचारणम् अकुर्वन् आचार्याः श्रीमच्छङ्करभगवद्पादाः।

### अन्तःकरणवृत्तीनां सामान्यपरिचयः

भाष्यकारैः ब्रह्मसूत्रभाष्ये निर्धारितमस्ति **मन एवान्तःकरण**मिति। मन्यते अवबुद्ध्यते ज्ञायते वा अनेन इति मनः। वेदान्तेषु अन्तःकरणस्यैव मनः, बुद्धिः, अहङ्कारः, चित्तञ्चेति चतुर्धा विभागः विद्यते। एतेषां चतुर्णामपि कश्चित् भेदः तथा साम्यञ्च विद्यते। तत्र संकल्पविकल्पात्मकं मनः, निश्चयात्मिका बुद्धिः, अभिमानपरकः अहंकारः, गर्वात्मकं चित्तञ्च इति।

न केवलं तानि, अपि तु कामसङ्कल्पादिकमपि मनोधर्म इति साक्षात् श्रुत्या[1] एव निर्णीतमस्ति। कामो नाम स्त्रीसंसर्गाभिलाषः। संकल्पो नाम शुक्लनीलादिभेदेन प्रत्युपस्थितविषयविकल्पनम्। विचिकित्सा संशयो भवति। देवतादिषु आस्तिक्यबुद्धिरेव श्रद्धा। तद्विपरीता अश्रद्धा । धृतिर्नाम धारणम् देहाद्यवसादे उत्थम्भनमित्यर्थः। तद्विपर्यया अधृतिः। ह्रीर्नाम लज्जा, भीर्नाम भयम्। इत्थं एतानि सर्वाण्यपि अन्तःकरणस्य मनसः रूपाण्येव।

**गीताप्रस्थानम्**

अष्टादशाध्यायिनी अद्वैतामृतवर्षिणी इयं श्रीमद्भगवद्गीता साक्षात् श्रीमन्नारायणेन लोककल्याणाय उपदिष्टा । उक्तं च-

**"गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।**

**या स्वयं पद्मनाभस्य मुखपद्मात् विनिसृता।"**इति।

अस्यां समस्तवेदवेदाङ्गादीनां सारसर्वस्वम् अन्तर्निहितमिति मन्यमानैः भगवत्पादैः गीताभाष्ये एवं प्रतिपादितम्-

**"तदिदं गीताशास्त्रं समस्तवेदार्थसारसंग्रहभूतं दुर्विज्ञेयार्थं च"**[2] इति।

पञ्चमवेदस्वरूपस्य महाभारतस्य भीष्मपर्वणि वर्तते इयम्। अल्पबुद्धयोपि मानवाः अस्याः सामान्यमर्थमवगन्तुं शक्नुवन्ति। तत्र गीताप्रस्थाने त्रयोदशाऽध्याये गुणत्रयविभागयोगे त्रिगुणाः अन्तःकरणवृत्तीः आश्रित्य तिष्ठन्ति इति दृष्टुं शक्यते। सत्वरजस्तमांसि त्रिगुणाः वर्त्तन्ते। अत्र गुणाः इति पारिभाषिकपदमेव , रूपादिवत् द्रव्याश्रितगुणाः न। अत्र गुणगुणिनोः भेदो नास्ति। त्रिगुणाः स्वस्य कार्यमज्ञात्वा अविद्यारूपेण आत्मनि तिष्ठन्ति।

**त्रिगुणस्य लक्षणम्**

**सत्त्वगुणः –** तत्र सत्वं निर्मलत्वात्प्रकाशकमनामयम्........[3] इत्यनेन स्पटिकमणिरिव निर्मलप्रकाशरूपेण तिष्ठति सत्त्वगुणः इति ज्ञायते। सत्त्वगुणस्य प्रकाशेन ज्ञानं उत्पद्यते। सः सुखाद्यज्ञानेन आत्मनि **अहं सुखी अहं दुःखी** इत्याकारेण व्यवहारं जनयति। अन्तःकरणस्य अविद्यावशात् अज्ञानिनः ज्ञानित्वेन, असुखिनः सुखित्वेन मिथ्याज्ञानं प्राप्नुवन्ति। त्रिगुणस्य सहायेन अन्तःकरणस्य विषयः तत्तदाकारवृत्तिरूपेण बहिः प्रतिफलति।

**रजोगुणः – रजो रागात्मकं विद्धि तृष्णाऽऽसंगसमुद्भवम्......**[4]
रजोगुणः रागात्मकं रञ्जनरूपस्वरूपं तृष्णाकार्यं च उत्पादयति। तृष्णा नाम अप्राप्ते अभिलाषा, अप्राप्तविषये मनसः प्रतिफलनं भवति असंगः। एवंप्रकारेण रजोगुणस्य विषयः अन्तःकरणे प्रकाशयति।

**तमोगुणः – तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्.....**[5] तमः तृतीयो गुणः अस्य विषयः अज्ञानवशात् उत्पद्यते । अज्ञानवशात् मोहः उत्पादयति, देहे च निद्राद्यालस्यं च उत्पादयति। मोहभ्रमरूपेण तिष्ठति एतत् त्रिगुणमपि अन्तःकरणवृत्तिवशात् अनुभूयते।

**त्रिगुणानां व्यापारः**

**सत्त्वं सुखे संजयति रजः कर्मणि भारत।**

**ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत।।**[6]

सत्वं सुखे संक्ष्लेषयति, रजः तु कर्मणि, किन्तु तमः सत्वगुणात् जनिते विवेकज्ञाने आवरणरूपेण तिष्ठति। ततः प्राप्तकर्तव्याकरणप्रमोदं अन्तःकरणे जनयति । एवं च यदा रजस्तमश्च उभावपि सत्त्वमभिभूय तिष्ठति तदा सत्त्वगुणः सत्वात्मकज्ञानकार्याणि उत्पादयति। तथैव यदा रजस्सत्वं च तमोगुणमभिभूय तिष्ठति तदा रजोगुणः कृष्यादीनि पशुपालनकर्माणि करोति। सत्वं रजश्च तमोगुणमभिभूय तिष्ठति यदा तदा तमः आज्ञानादि स्वकार्याणि करोति।

स्थूलसूक्ष्मात्मकप्रपञ्चस्य तत्कारणभूतायाः अविद्यायाः च कारणं अन्तःकरणं तद्वृत्तयः तदाश्रितत्रिगुणाः च भवन्ति।

**सहायकग्रन्थसूची**

श्रीधर्मराजध्वरीन्द्रः **- वेदान्तपरिभाषा** - चौखम्भा संस्कृत संस्थान (प्रका), वारणासी।

श्रीमच्छङ्करभगवत्पादाचार्यः **- श्रीमद्भगीताशाङ्करभाष्यम् –** गीताप्रस् (प्रका)

केशवरावसदाशिवशास्त्री **- श्रीमद्भगीतारामानुजभाष्यम् -** चौखम्भा संस्कृत संस्थान (प्रका) - वारणासी

शाङ्करभाष्यार्थः **- ईशादि नौ उपनिषद् -** गीताप्रेस् (प्रका) गोरख्पुर्।

**श्रीमद्भगीताशाङ्करभाष्यम् (**मलयालम्) - सदानन्द प्रेस्स् (प्रका), सदानन्दपुरम् ।

**सन्दर्भसूची**

[1]कामसङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव ।

[2]गी.उप.भा

[3]गी.उप.भा

[4]गी.उप.भा

[5]गी.उप.भा

[6]गी.उप.भा